वृत्ति

श्रीगणेशायनमः उत्तरतउपचारोविहारः द्विपदंपरिभाषासूत्रं नियतापरिभाषानियमेनभवति उपचारस्याधि
करणतयाउत्तरादिकंनियम्यते उपचरमुपचारः इतिकर्तव्यता आगदुपकारकसंन्निपत्योपकारकरूपतोऽध्य
वसितउपचारइतिकर्तव्यतेत्यर्थः पाकयज्ञोपचाराग्निमुपचरति नृसीमग्निहोत्रोपचारइतिप्रयोगदर्शनात्
विहारइत्यनुवर्त्यते विहारंपुरस्कृत्येतिप्रयोगात् उत्तरस्यांदिशिउत्तरस्मिन्देशेवाश्रीत्तरतःशब्दोनतुका
ले दिक्शब्देभ्यःसप्तमीतिवर्तमानेदक्षिणोत्तराभ्यांतसत्ययः उत्तरतउपचारोयस्यसउत्तरतउपचारइतिबहु
पदार्थोबहुव्रीहिः सचान्यपदार्थोविहारः उत्तरतउपचारोभवतीतिशेषः एतदुक्तंभवति विहारस्योत्तरतउप
चारःकर्तव्यः गोदोहनवत्सापाकरणवेदकरणादिरुपचारोयःप्रोक्तःसस्वस्ववाक्येउत्तरतोनियमेनकर्तव्यः दक्षि
णतःप्राग्वापश्चाद्वाइत्यादिनिरुत्यर्थंउत्तरतोनियमःरुनः अंतराकर्तुं द्विपदंपरिभाषासूत्रं अंतरंमध्येनयो
गेनियज्ञांगानिभवंति एवंहिनानियज्ञांगानिअंतराणिभवंति विहारस्यचांगानांचांतरेणकर्तानसंचरेदिति
तत्रद्विविधानियज्ञांगानिसाक्षाद्व्यवधानेनचतत्रसाक्षात्पुरोडाशयूपःसोमादीनि व्यवधानेनस्रुक्येध्मब
र्हिःस्रुगादीनि व्यवहितांगानांसाक्षादंगान्यंतराणि एवमृत्विजोयजमानोंऽतरःपत्नीयजमानोंऽतरइति यद्य
दंगंसाक्षात्तत्तदंगेअंतरंइतिनियमार्थेसूत्रंननियमनिवृत्यर्थं ऋत्विजोमध्येपरस्परंअंतरोयोयःपूर्वोनिर्दि
ष्टउत्तरोनिवाक्ये कर्तुर्वाच्यानिस्रुकूहविरादीनिसामर्थ्यात्भवंति चत्वारिकर्मणः अष्टपदंपरिभाषासूत्रं अ
ग्निप्रणयनदेवागानु जपशाखाछेदनानुमार्जनमित्येवमादीनिचत्वारिचत्वारिकर्माणिप्रकर्षेणसम्यक्समंताद्वा

पश्यन्नरीक्ष्यमाणः आचनुर्थात्कर्मणः अभिविधिपक्षेसंनमनादेःमर्यादापक्षेअनुमार्जनादेःकुर्यात् एवंक्रि
यमाणंकर्मअभ्युदयकारिभवतिइतरथाविगुणंस्यात् मंत्रांतेन० येन् द्विपदंपरिभाषा त्रे मंत्रस्यांतेमंत्रांतः
मंत्रसमासोयोनःसइत्यर्थः कर्मणआदिःकर्मादिः आद्यक्षणइत्यर्थः मंत्रांतेनेत्थंभूतलक्षणात्तृतीया मंत्रां
तेनेत्योच्चार्यमाणेनकर्मादिःसंनिपातोयथाभवतितथाकुर्यादितिनियमः मंत्रांतग्रहणंमंत्रादिमंत्रमध्यनिवृत्य
र्थं कर्मादिग्रहणंकर्मांतकर्ममध्यनिवृत्यर्थं आदिनोत्तरम्येतिपंचपदंस्वशाखाशास्त्रसमयोपदेशसूत्रं नं
नंमंत्रंप्रतीक्ष्यात्रकर्मसूत्रितंनेनसमग्रमंत्रंपठित्वामंत्रांतेनकर्मादिसन्निपातयेदित्युक्तंनत्रनज्ञायतेकिंप्रमा
णोयंमंत्रइतिनतःप्रमाणंकथयति उत्तरंमंत्रस्यआदिनाआरंभेणश्रवाअस्मिंगोपनोयदिदाभ्यःशुचिरस्मा
कोसीत्यादिनाप्रतीकेनपूर्वमंत्रस्यदेवोवःसवितोत्पुनंतुहिरण्यवर्णाःशुचयःसूर्यस्यचक्षुरित्यादेः अंतेसमा
सिमाघशंसःप्रवहंतुदेवीःवणत्किंदनेवसइत्यादिजानीयात् पारशाशाख्यस्तुकरुनःपठयते ननुपारशा
ख्यानामपिप्रमाणंप्रतिसंदेहः शुंधंतांपितरइत्यादीनांकिंएकोमंत्रःउतप्रतिपर्यायेमंत्रः अभिधानसामर्थ्या
देवमाहोस्वित्स्थूलानपित्रादीनामभिधेयानांप्रतिवाचयंमंत्रभेदः यत्रद्वाभ्यांषड्भिस्त्रिभिरेताभ्यामेनाभिरि
तिसंज्ञाशब्देनचनिर्देशस्तत्रप्रत्यंचंप्रतिपर्यायेमंत्रः एवंसंख्यानिर्देशोऽर्थवान्भवति यज्ञोपवीतीकु
र्यात् अष्टपदं कुर्यादितिप्रत्येकंसंबंधः यज्ञोपवीतंवस्त्रविन्यासविशेषस्तद्वान् यज्ञोपवीती उपवीतदक्षिण
बाहुःकर्मकुर्यादित्यर्थः॥ दक्षिणाचारइतिबहुव्रीहिः दक्षिणेनहस्तेनआचारःकर्मयस्यास्तीति दक्षिणहस्तेन
कर्मकुर्यादित्यर्थः। प्राक्शब्देनात्रप्राङ्मुखःकर्तोच्यते नदिक्शब्दोवा तेनप्राङ्मुखःकर्मकुर्यादित्यर्थः प्रा

॥ वृत्ति ॥
॥ २ ॥

स्रुस्वः प्रतिगृह्णाति प्राञ्चुखोवतिष्ठेत प्रागुपक्रम्य जपतीति प्रयोगदर्शनात्॥ न्यायादनपेतं न्याय्यं॥ यथान्यायं कर्म कुर्यात्॥ तथा चोक्तं॥ यदि क्रीतियववत् स्रुगद्भिः अवघातादिसंस्कारवद्भिः प्रेतंस्यात् न वा किंचित्कस्यचिद्धर्मस्य विशेषणं निषेधकं वा दर्शितं स्यात्॥ अतोनकर्तव्यं न्याय्यमस्य न घातादि तत्र समदर्शनात्॥ नवा पादोशनक्षत्रचर्वादौ च न्याय्यं नस्यादनेनैवहेतुना॥ ननु च न्याय्यशब्दोत्रसौत्रोनर्थकः स्यात्॥ नैवं॥ स्रुगद्रव्येअवघातादि नस्यात् अप्रयोजकत्वात्॥ यजुर्वेदेनोपांशु कर्म कुर्यादिति॥ उपांशुग्रहणं नपुंसकलिंगत्वात् क्रियाविशेषणं॥ दर्शः॥ णः त्रिपदं॥ दर्शशब्देनामावास्योच्यते॥ पौर्णमासः पौर्णमासीति॥ उपांशुग्रहणं दर्शेअमावास्यायांविहितंप्रधानयागत्रयंदर्शयोगादर्शशब्देनोच्यते॥ एवंपौर्णमासशब्देन॥ तयोर्दर्शपौर्णमासयोप्रधानयागत्रिकयोर्धर्माः प्रत्येकंआग्नेययागस्यचउपांशुयाजस्यचआग्नीषोमीयस्यचैद्राग्नस्यउपांशुयाजस्यचमादेंद्रस्यचवाएकैकस्यकार्त्स्न्येननसाधारणाः॥ सामान्याः॥ एवंसतिसर्वेधर्माः प्राप्नुवंति॥ क्रीतियवानांविलयनगार्हपत्याधिश्रयणादयः स्रुगाज्यस्यावघातादयःसाम्नायस्यच॥ एवंसतिनिश्चयमाह॥ निर्दे॰ रन्॥ द्विपदंचैतत्॥ निर्देश्यन्तइतिनिर्देशाः॥ साधनं॥ निर्देश्यतेअनेनेतिवानिर्देशः॥ निर्देशशब्दः साधनस्य वाचकः॥ तस्मान्निर्देशाद्धेतोः सर्वे सर्वत्र नप्राप्नुवंति॥ किंतुयेयत्रैवनिर्देश्यंते तत्रैवसाधननिर्देशान्निश्चिरन् प्राप्नुवंतीत्यर्थः॥ यथाहविष्यानिति निर्दिश्य अवघातादयस्तेहविष्वेव एवंसर्वत्रज्ञातव्यं॥ अदृष्टार्थाअपिपर्यग्निकरणादयस्तेषामपिनिर्देश्यन्तस्था॥ साधनविशेषपुरोडाशेयद्यपिनियमोनिर्देशात् क्रियतेतथापिसाधारणाः षट् प्रधानानाएकैकस्य॥ अतएवहींषिपर्यग्निकरोतीति॥ तथाहिद्वारेणलवणादयःसा

धारणा॥ तथाज्याद्वारेणविलयनादयः॥ प्रयोजनाभावात्अवघातादीनामाज्यादिषुलोपः॥ यथाचमुख्ये पुरुषविकृताहानंनानावीजानांसाधारणं॥ तस्माद्येयत्रप्रयोजनवंतस्तेतत्रक्रियंते॥ न्याय्यंकर्मकुर्यादित्युक्तंतस्यैवप्रपंचोयं॥ चत्वारऋत्विजः॰ द्वौ॥ षट्पदंपरिभाषासूत्रं॥ ऋत्विजशब्दोवरणभरणनिमित्तकोअध्वर्युादिषुवर्तंतेसनुयौगिकश्चमासाध्वर्युणापित्रसंगात्॥ तेपियजंत्येव॥ ननुवरणंभरणंतेषामस्ति॥ तेपिऋत्विजःस्युः॥ ततश्चऋत्विजउपतिष्ठंतेइत्यादेश्चमसाध्वर्युणाग्रहणंस्यात्॥ अतएवहोत्राग्रहणंचमसाध्वर्युनिवृत्त्यर्थंहोत्राऋत्विजोहिरण्यस्यजंति॥ वरणंतुतेषांलौकिकंमंत्रामानात्॥ यथात्रापित्रयाणांलौकिकंवरणंब्राह्मणएवमंत्रवत्॥ वाचनीकं॥ अत्रचनुग्रहणंकिमर्थंयावताअध्वर्यादयःपाठादेवचत्वारःस्युः॥ नचनियमार्थं॥ ब्राह्मणाःप्रचरंतीतिगुणविधानानुपपत्तेः॥ नियमस्यतुपाठादेवसिद्धेचनुग्रहणमनुवादः॥ यद्वाकृत्स्नफलक्षणार्थं॥ एकस्यापराधेप्रायाश्चित्तंमाभूत्तयःप्रचरेयुःसर्वेसर्वेकुर्युः कर्तृत्वेनकर्मणियस्मात्तेचनाः निर्देशात्व्यवतिष्ठेरन्इति॥ यद्यस्यादिष्टंसत्कुर्यात्॥ अनादिष्टंतर्हिसमंविभज्यसर्वेकुर्युरित्याशंक्याह॥ अनादेशेध्वर्युःकुर्यादिति॥ त्रिपदंपरिभाषासूत्रंचेतत्॥ आदेशोविनियोगोब्रह्मादीनांयत्रनास्तितत्रअध्वर्युःकुर्यात्॥ षट्प्रकारस्याप्यादेशस्यामित्राः सौत्रोलौकिकोवार्थेप्राकरणिकःस्थानिकःसमाख्यश्च॥ तत्रसौत्रोयथात्वंमध्वर्युर्भवत्वंमहीताभवत्वंमग्नीद्धेवेति॥ ब्रह्मणाभ्रूयतेइत्यादिमंत्रस्तोमेन॥ पथिन्यास्यादित्याप्राश्नामीत्याग्नीध्रस्यादेशः स्वोवोविश्वसनेहोतुः॥ एवंयजमानपत्न्यादीमाज्यावेक्षणादौमंत्रलिंगाच्च॥ यत्रस्यासिकर्मानिकेनिचायथापितुनाम्ना

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥ वृत्ति ॥
॥ ३ ॥

वितियजमानस्यवाक्येने ति॥ प्रकरणात्॥ यथाहिऋग्यजुषीःशुचयइतिस्थाक्रमस्नानादीक्षितस्य॥ स्थानान्
यथामारुत्यंमेषंमवदधातीतिऋतिक्रम्यानुः समाख्यायायथाहोत्रंहोतुः ब्रह्मत्वंब्रह्मणः॥ याजमानंयजमा
नस्य आध्वर्यमवध्वर्योरवंभविष्यतिसमाख्याया॥ किमर्थमनादेशेध्वर्युकुर्यादिति॥ सर्वमनादेशेध्वर्यर्वब्र
ह्मत्वंहोत्रयाम्याजमानिकंच॥ यद्पूर्वदिकत्वात्॥ तत्रअनादेशएवअध्वर्युःकुर्यात्॥ नादेशेइति इतरथाप
थिव्यास्त्वादात्राप्राश्नामीतिसमाख्यायाः अध्वर्योरपिप्राशनंस्यात्॥ एवंपरिभाषासूत्रस्यार्थंसम्यगनुव
र्ण्यदर्शपूर्णमासप्रकरणसूत्रस्यार्थंसम्यगनुष्ठानसिद्धयेअनुक्रमेणोच्यते॥ उपवत्स्यशानेभुक्तेगार्हपत्या
दाहवनीयंज्वलंतंप्रणयति॥ षड्पदमिदंसूत्रं॥ पत्नीयजमानाभ्यांमाषौमांसाश्चज्ञत्यत्सर्पिष्मत्घृत
युक्तंनियमपूर्वकं॥ उपवत्सोरशानंहविष्यादिनमिनभुक्तेगार्हपत्यात्दार्वादिभिर्ज्वलंतमाहवनीयंप्र
णयति॥ देवाज्ञप्त्वा॥ देवागातुविदइतिमंत्रंजपेपदेशात्मस्वरंपठित्वा॥ अयंचमंत्रोयज्ञयोजनार्थः य
ज्ञःप्रयुज्यतामितिमंत्रलिंगात्॥ अग्निंगृहपतिमीतिवत्॥ तेननशास्वाभिगमनांगः॥ क्षाप्रत्ययश्चैककर्तृ
केपूर्वकालतायांचोपपन्नः॥ व्रतोप॥ इति॥ व्रतेनोपनस्ययजमानस्यशास्वामासुंअभिगच्छति॥ आछासे
रासुमितिशाबरपुणिरितियास्कः॥ अन्वाधानस्यचव्रतोपायनात्पूर्वंपाशात्तस्मिन्नपिकृतइतिगम्यते
व्रतोपनस्येतिषष्ठ्यायजमानस्यशास्वाभिगमनसंबंधोज्ञापितः॥ इतरथाव्रतोपनइत्येवावक्ष्यत्॥ तांशा
स्वांविशिनष्टि॥ पर्णशास्वांपरि॥ पर्णःपलाशस्तत्संबंधिनीं॥ शमीशास्वांवा॥ यच्छमीशास्वयावत्सानपाकरो
तितिश्रवणात्॥ प्रागुदीचींइशानाभिमुखीं॥ बह्व्यःशास्वाःयस्यांसातां॥ बहुपर्णीबहुपत्रीं॥ अस्यधिरांज

छिद्रां॥ इषे० नि॥ तांशास्वामिषेत्वेतिमंत्रेणछिनत्ति॥ ऊर्जे० ष्टि॥ अनुमार्जनंअन्नहस्तेनमार्जनं॥ पत्नीदि
क्षानन्यायेनैवक्ष्यमाणत्वात्॥ सः यति॥ संनमनंशास्वायाऋजुकरणमुच्यते॥ वा० ति॥ वायवस्थेतिमंत्रेण
तयाशास्वयागोभ्यःपदवत्सान्पृथक्करोति॥ प्रतिसंस्कार्यसंस्काराद्गोषामायांकेषुचिद्दोषमाह॥ त्रीव०
न॥ त्रीनवत्सान्मंत्रेणदोह्यमानानांगवांयजुषाबायवस्थेतिमंत्रेणपाकरोति॥ त्रीनवत्सान्नस्त्रीमपाकरोति
अस्मादेवज्ञापकात्पदगावोदोह्याइतिगम्यते॥ तथाचकात्यायनः॥ निःसृणांगवांसमंत्रकंदोहमुक्ताविसृष्टवागु
नरा॥ अनन्वारब्धेयावत्यधिकारातिस्रोवानित्यत्वादित्याह॥ अपाक०॥ ति॥ मंत्राणामानानात्तृणमुपस्पर्शनं
देवोयति॥ देवोवःसवितेतिमंत्रेणतस्माद्देशादन्यदेशंप्रापयतिप्रेरयतीत्यर्थः॥ वत्सानांतासांचमेलनंमाभू
दिति॥ आप्यायध्व०॥ याज्ञिनःएकेनप्रयत्नेनसर्वासांपापणस्यकर्तृत्वात्सर्वापक्षेबहुवचनं॥ तथा
चप्रकृतौसमवेतत्वात्बर्हीनांदधनकवचनांतत्वोहः॥ यत्विदंनमन्यमानंतेषांप्रत्येकंसमंत्रकंप्राप्
णंतथासमवेतत्वान्तविकृताबर्हः॥ महेद्रायेतिमहेद्रायाजिनः॥ नत्वयमूहः किंतुशास्वांशास्वांतरेएतादृशा
मंत्रःपठयतइत्याशायः॥ शुद्धाःरनुमंत्रयते॥ गच्छंतीर्गाअनुमंत्रयते॥ अनुमंत्रणस्वरूपंचोक्तमभियुक्तैः॥ मंत्रमुच्चा
रयन्तेवसंज्ञांसीत्वेनसंस्मरन्॥ शोषणतन्मनाभूत्वास्यादेतदनुमंत्रणं॥ दोहप्रकरणेऽपिमंत्रसमीपेसर्वत्रेंद्रप
दस्थानेसूत्रकारेणमहेंद्रपदस्योक्तत्वादत्रचानुक्तत्वान्नात्रमहेंद्रपदंमंत्रैकदेशइतिकेचित्॥ अपरेतुगत
मिंद्रायेतिप्रकृतयमहेंद्रायेतियदिमहेंद्रयाजीभारद्वाजसूत्रेकवाक्यतयामहेंद्रायेतिमहेंद्रयाजिनइत्यस्यसू
त्रस्यकाकाक्षिगोलकवदेतत्परत्वमप्यपवर्ण्यइंद्रपदस्थानेमहेंद्रपदमानयंति॥ ध्रुवा० वर्तते॥ माध्वध्व

॥ इति ॥
॥ ४ ॥

योः स्वगृहान् प्रति गमनमिति यजमानग्रहणं यजमानं० जपति ॥ ऋत्वाऽस्य मुं मंत्रं यजमानं प्रेक्ष्यमाणो जपेत् अस्मादपि ज्ञापकान् शास्त्राहरणे संनिहितो यजमानः इति गम्यते ॥ अग्निष्ठं० रूपति ॥ गार्हपत्याख्याग्निसमीपे निष्ठतीत्यग्निष्ठः शकटः ॥ अबांवगोधूमीत्यादिनास्य मूर्ध्न्यः ॥ तस्मिन्नग्न्यगारेतिसामान्यनउक्त्वात् गार्हपत्याहवनीययोरन्यतरस्मिन्वा तोशास्त्रां प्रत्यग्रा मुपगृह्णाति ॥ प्रतिचीं शास्त्रा मुपगृह्णातीति श्रुतेः ॥ उत्तरतो ऽग्नेः गार्हपत्यादुत्तरस्यां दिशि स्थितमसिं स्वयमपि नदेशस्थोस्वस्येति मंत्रेण गृह्णाति ॥ अयंचमंत्रः ॥ आददऽर्यमेत्यो ब्राह्मणपाठात् ॥ गोप० ष्ठतो उपस्थानंचनिष्ठतोकार्यगतिनिवृत्तिमात्रधात्वर्थप्रतीतेः ॥ उपवेशनंचरेचणादिसंकोचनक्रियांतरप्रवेशरूपान् ॥ उर्वी० अति ॥ आहवनीयंप्रतिगच्छति ॥ प्रय० ष्टपति ॥ आहवनीयेनिष्टपति असिर्लोमनिशेषः प्रेयम० जपति प्रेयमगादिमंमंत्रं जपति ॥ प्राग्० बर्हिरछेत्ति आहवनीयात् प्राच्यामुदीच्यांवा पदार्थतयाकिंचिद्गत्वा यस्यांकस्यांचिद्दिशिस्थितं बर्हिः प्राक्संगच्छति ॥ तथाचबौधायनः ॥ अथतांदिशमेतियत्रबर्हिर्वेत्स्यन्मन्यतइति ॥ आपस्तंबोपि ॥ प्राचीमुदीचींवा दिशमाव्रजतः कुतश्चिद्दर्भमयं बर्हिराहरतीत्याह ॥ प्राच्यादिदिक्स्थमेवबर्हिरभिप्रेतंस्यानदाभिप्रव्रज्येनिनाक्षयत् देवानां० ग्रसिरितिप्रस्तरार्थं तावतादर्भानपरिगृह्णाति ॥ दर्भस्तंबंपरिगृह्णातियावंतमलंप्रस्तरायमन्येतदेवानां परिषद्यसीतिबौधायनः ॥ विष्णो० शकृ संनिधानात्प्रस्तरायपरिगृहीतं ॥ अंतेपरिगृहीतदर्भप्रांते एकैकांतेदर्भेऽतिसृष्टइतिन्यजति ॥ शेषप्रस्तराय ॥ प्रस्तरायपरिषूवतीत्येतेनैवप्रस्तरार्थत्वेसिद्धेपुनरुक्तिः परिषवणादिभाधरूर्यंतस्यप्रस्तरार्थत्वज्ञापनार्थी ॥ माधो० जयति देवकृतेति देवस्यत्वेतिमंत्रेण बिसानिस्रोग्रकोशादुपरिशालाकारूपाणि प्रतिलुनाति

सनखं० सादयति ॥ संगतांगुल्यंगुष्ठनखमुष्टप्रमाणकप्रस्तरंपृथिव्या ॥ इतिमंत्रेणभूमिप्रस्तरयोर्मध्ये एकंतृणमंतर्धायतत्रप्रस्तरंसादयति हेतृणपृथिवीसंपर्कान्मप्रस्तरंपाहीतिमंत्रार्थावगमात्तृणांतर्धानेमंत्रोप्रस्तरसादने ॥ अकल्माषान् नप्रधूनयन् ॥ अचित्रान्नदभानबृहन् अकंपयंश्चलुनाति ॥ प्रभृतानित्यकर्तृकत्रसनखमुष्टमात्रंलवनमितिगम्यते ॥ इदंचलवनमास्तरणार्थबर्हिषः ॥ अतश्चदेव्यसदनदेवस्त्वेतिलवनांगमंत्रः पुनः पुनरावर्तते ॥ आछे० ऽपति ॥ अयमपिप्रतिलवनमावर्ततइति ॥ तत्रजपमंत्राणामकरणत्वात्सर्वेतेजपितोजनयत्येवमर्वमदृष्टमुपकारं ॥ अतस्त्व० शति ॥ आलवानलूनबर्हिःस्थानानि ॥ सहस्व० प्रत्यभिमृशति ॥ अभिमर्शोनरंचोदकस्पर्शः ॥ छेदनभेदनेचैवपैतृके रौद्रराक्षसे ॥ आत्माभिमर्शनेचैवनिरस्यापउपस्पृशेदितिवचनात् ॥ आयु० प्रदक्षिणं धातवस्त्रणमुष्टिप्रक्षेपास्तिरयुक्संख्याकैः प्राचीनप्रदक्षिणेननिर्मितंशुल्बंबर्हिःसंहनार्थंरज्जुं अयपिनेतिमंत्रेणधातुनासंदधाति ॥ मंत्रश्चधातौधातौआवर्तते ॥ अदित्यारास्ना० माष्टितच्छुल्बंअनुलोममितिमूलादारभ्याग्रपर्यंतंअदित्याइतिमंत्रेणत्रिरनुमार्ष्टि ॥ मंत्रश्चैकवारमेवप्रयोक्तव्यो नप्रतिक्रियं ॥ वेदप्रोक्षणेमंत्राभ्यासइतिजैमिनीयादेकद्रव्यैकमार्त्विज्यसन्मंत्रवचनस्तुतीत्यादितिकातीयाच्च ॥ यथा० रक्तिः ॥ सुसंभृतेतिमंत्रेणप्रथममुष्टिक्रमेणतृतीयमुष्टिक्रमेणवाउदगग्रेशुल्बेबर्हिःस्त्रिसंभरति ॥ बोधायनः ॥ तूष्णींपरिभोजनीयानिलुनातिमत्रदात्छिन्नेपित्रभ्यआछिनत्तीतिपरिभोजनीयानिपरिस्तरणोलपलाशाद्याः ॥ श्रीनित्रृणानि ॥ इतिपरिभोजनीयादीनांछेदनमाह ॥ अयुपितायो० प्रस्तरंसंभरतीतिशेषः प्रस्तरस्यपृथक्संभरणेपदृशात् संभृतबर्हिषःउपरि

तत्संभरणं॥ तथाचापस्तंबः उत्तमेनिधनेप्रस्तरमाधायेति॥ बिल्वनवाहिरिंकेनिधनमुच्यते॥
इंद्राण्यासंहृत्यानि॥ अंतौशुल्बपाताौसमायम्यएकीकृत्यपूषानरातिंयदक्षिणमावेष्टयति॥ आवेष्टनोपदेशा
च्चनग्रंथिकरणं॥ ग्रथिंग्रथ्नातीतिमंत्रवर्णोग्रंथिविस्रंसनोपदेशश्च ग्रंथिरिक्तिगौण्याख्यानेयः॥ आवे
ष्टवेष्टनशाद्वस्य ग्रंथिपरत्वात्प्रादक्षिण्यमसमंजसंस्यात्॥ सतं कर्षतीति॥ पश्चादितिनदिगभिप्रायं किंतु॥ पश्चा
द्भागाभिप्रायं॥ तेनआवेष्टितशुल्बप्रांतःपश्चाद्भागेनिगृह्यथाप्राच्यांनिःसरतितथोपगूहतीत्यर्थः॥ आ
पस्त्वा॥ रभते॥ संनद्धंबर्हिरापस्त्वेतिमंत्रेणाद्यमनर्थेस्पृशति॥ इंद्र॥ उद्यच्छते॥ शिरसिनिधानायोद्यच्छति
बृहस्पतेऽहरामि॥ मूर्धानंनिदधातिउर्वे॥ एतंगृह्णातिएनीत्यर्थः॥ आदित्यस्त्वा॥ यंति॥ अपरोगार्हपत्यः
आहवनीयापेक्षयाअपरश्चासौदेशसंबंधात्॥ तस्यपश्चात्स्थापयति॥ अनोधोवा॥ अग्निष्ठशकटस्याधस्ताद्वास्था
पयति॥ बर्हिरधातिउपरिगवाक्षादौसंनद्धमिध्मंस्थापयति॥ इध्मस्यपरिधीनांचेदेर्ध्यगुक्तंपरिशिष्टं द्विप्रादेश
नामिध्मशुल्बानि॥ अरत्निमात्राःपरिधयःप्रादेशाधिकारत्निदक्षिणाग्निहोमेइध्मपरिवासनान्युपसमाधाये
तिसूत्रणादत्रावसरेतेषामपिनिधानं॥ तथाचापस्तंबःद्वेधासंनहनमुक्त्वाअनधोनिदधातीध्मबर्ह्यथनानिनि
दधातीत्याह॥ १॥ चंदद्व॥ चरंतिचंद्रादर्शनेमावास्यायां॥ षोढाविभक्ताद्भश्चतुर्थभागेअपराह्णसंज्ञकेपिंडपितृ
यज्ञाख्येनकर्मणानुपतिष्ठंति॥ बहुवचनंपत्नीयजमानाध्वर्युपेक्षयाज्ञेयं॥ माभूत्सिनीवात्यामितिचंद्रादर्शी
नइत्युक्तंतददर्शनमभ्रादिनापिभवतिअतःअमावास्यायामित्युक्तं॥ तथाचामावास्यायांपत्संधौभवती
येतदुक्तंभवति॥ एतस्यचदर्शोगत्वंकात्यायनेनोक्तं अगंवासमभिव्याहारादिति॥ नैमिनि॥ स्त्वनगत्वमाह॥ पूर्व
युरिध्मबर्हिःकुर्वंतीतिश्रुतेः॥ इध्मबर्हिःसंनह्येत्युक्तं॥ अनस्तृतिवक्तव्येअग्निष्ठग्रहणंनर्याद्यथापूर्वस्थत्व
ज्ञापनार्थं तथाचबाजसनेयिश्रुतिः॥ अधनेनगार्हपत्यंप्राचीनावीतिभूत्वादक्षिणासीनएतद्धुत्वातीति॥ प्राग्
क्षिणाचाराः॥ प्राचीचदक्षिणाचानयोरंतरालेयादिक्सासाग्दक्षिणा॥ आग्नेयीदिक्॥ यदाग्नेयंश्रुत्यर्थः म
त्रकरणेअग्नेस्तोमभागेतेनविदतोपसंगृह्यतएवतथापिंडपितृयज्ञस्यावसरविधानार्थमनुवदतइत्यदोषः॥
एवंचवेदवेदीकरणंपिंडपितृयज्ञोत्तरमेव॥ तस्यामाचारःकर्मयेपांतप्राग्दक्षिणाचाराः॥ बहुवचनात्सर्वेभ
वंतीतिशेषः॥ प्राचीनावीतीति॥ प्राचीनावीतीत्येकवचनमध्वर्युपेक्षं॥ अनोदग्ध्वर्युःकुर्यादितिपरिभाषया
सर्वकर्मणिअध्वर्योरधिकारात्॥ दक्षिणाग्नेस्तत्रतःपश्चादितिवाग्यांदिग्विकुशासंस्तीर्यतत्रवक्ष्यमाण
निपात्राण्यासादयति॥ तान्येवाहपवित्रं॥ दक्षिणंउदकस्थाली॥ एकैकमितिनद्वेद्वे॥ दक्षिणंदक्षिणमिति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017